This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ॐ नमो गणेशाय॥ संवत्सरो वै यज्ञः प्रजापतिः तस्यैतद्द्वारं यदमावास्या चंद्रमा एव द्वारपिधानः॥१॥
स योऽमावास्यायामग्नी आधत्ते यथा विवृतायां द्वारि द्वारा पुरं प्रपद्येत तादृक्तत् एवं स्वर्गं लोकमियादेवं त
थामावास्यायामाधत्ते॥२॥ अथ यो नक्षत्र आधत्ते यथा पिहितायां द्वार्यद्वारा पुरं प्रपित्सेत् स जिह्मः पुरः स्या
देवं तादृग्यो नक्षत्र आधत्ते तस्मान्न नक्षत्र आदधीत॥३॥ यदहर्वै न पुरस्तान्न पश्चाद्ददृशे तदह
रुपवसेत्तद्धि ह्येष इमं लोकमागच्छति तस्मिन्निह वसति॥४॥ स वै देवा वसंति॥ सर्वाणि भूतानि सर्वा दे
वताः सर्वस्त्वेव सा विश्रामाः सर्वाणि पृष्ठानि सर्वाणि छंदांसि ५ स यत्सर्वेषु ह वा अस्यादावसु सर्वेषु दे
वतासु सर्वेषु भूतेषु सर्वेषु स्तोमेषु सर्वेषु पृष्ठेषु सर्वेषु छंदःसु अग्नी आहितौ भवतः य एवं तामावा
स्यायामाधत्ते तस्मादमावास्यायामेवाग्नी आदधीत ६ यास्मो विशाखस्थामावास्या तस्यामादधीत सा रोहिण्या

स यद्घृत आत्मा वै प्रजापतेः शावाराद्धि एषात्मन्यावित प्रजायां पशुषु प्रतितिष्ठ यमावास्यायामाधेयद्रूपं त
स्मादमावास्यायामेवाग्नी आदधीत पौर्णमास्यामारभेत तामावास्यायां दीक्षेत ७ ब्राह्मण... मंत्रिवा एत
द्यज्ञं यादनं तत्रातयं ये वराजानमति ... एवेति तत्रै घृतिय तस्मात् ८ सं ज्ञपयं त्रिविशास्माति तत्वं तु लूस्ननमस
वास्या दृषदुपला स्यात् ७ हविर्यज्ञं मन्यंति ... त ८ हत्वा यज्ञं अमावस्या नोऽरतो नूत ८ स्विं च यद्विवीया
नि यज्ञस्य मतत प्रजायातन दृशताऽऽकृतीः मंथ्यादाय द्याम्या चषकृक्रियाता २ अयं वै यज्ञो योऽयं पवते
सोऽयमेक इवैव पवते सोऽयं पुरुषेऽन्तः प्रविष्टो दशधा विहितः स एवं ह्य कृतैः प्राणे स्वे योनेरधि जायते
तस्य षोडशात्तरा विराक्षेषा संपन्नयज्ञः ३ अथो अपि न वसुः तं न्यूनां विराजं करोति प्रजननाय न्यूना
द्वा इमाः प्रजाः प्रजायन्ते सैषा संपन्नयज्ञः ४ अथो अप्येकातिरिक्ताः ... सा प्रजापतिमत्यतिरिच्यात सैषा

K S U LIBRARY RAMTEK 441106 M1121 Dist Nagpur
Checked 2012
M1121
Acc No 2041
Title:- शतपथ ब्राह्मण
Subject:- वेद
पत्र: 54
(1)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संपन्नयज्ञः ॥५॥ अथो अपि द्वे अतिरिक्ते स्यातां । द्वे द्वे वै मिथुनं प्रजननं मिथुनमेवैतत्प्रजननं क्रियते । स एषा संप २
न्नयज्ञः ॥६॥ अथो अपि तिस्रो ऽतिरिक्ताः स्युः । द्वे ह मिथुनं प्रजननमथ यज्जायते तत्तृतीयं । स एषा संपन्नयज्ञः ॥७॥
अथो अपि चतस्रो ऽतिरिक्ताः स्युः । तद्यथैकैकं वै तत्सर्वं यो वा इमे लोकास्तदिमानेवैतल्लोकांस्त्रिवृतिराप्नोति प्रजाप
तिं चतुर्थी मा ल्लोकांश्चतुर्थं स प्रजापतिमेवैतच्चतुर्थ्याप्नोति स एषा संपन्नयज्ञः ॥८॥ स यद्यप्याप्नुयान्नं तद्गुनाः । स्याय
स्यायत्संवत्सरतिरिक्तं तदतिरिक्तं । स्यायज्ञः । स एषा वदशाद्युषिसं पादषाद्वि । दशाद्यामषा सदस्रात् ॥९॥ अजि
वा एतत्क्षवं ति । ये दर्शपूर्णमासाभ्यां यजीत स चेत्पंचदश वर्षाणि यजेत तेषां पंचदशानां वर्षाणां त्रीणि च
शतानि षष्टिश्चापौर्णमास्यश्चामावास्याश्च त्रीणि च विंशतानि षष्टिश्च संवत्सरस्य रात्रयस्तद्रात्रीराप्नोति ॥१०॥ अथा
१ पराणि पंचदश वर्षाणि यजेत । तेषां पंचदशानां वर्षाणां त्रीणि च शतानि षष्टिश्चापौर्णमास्यश्चामावास्या
२

श्च त्रीणि च शतानि षष्टिश्च संवत्सरस्याहानि तदहान्याप्नोति तावद्वै संवत्सरमाप्नोति ॥ मर्त्या ह वा अग्रे देवा
आसुः । स यदैव ते संवत्सरमापुरथामृता आसुः सर्वं वै संवत्सरः सर्वं वा अक्षय्यमेतेना हास्याक्षय्यं सु
कृतं भवत्यक्षय्यो लोकः ॥११॥ स आजिसृतामेकः । य एवं विद्वांस्त्रिंशतं वर्षाणि यजेत तस्मादु त्रिंशतमे
व वर्षाणि यजेत यद्यु दाक्षायणयज्ञी स्यादथो अपि पंचदशैव वर्षाणि यजेतात्र ह्येव सा संपद्यते यद्
द्वे हि पौर्णमास्यौ यजते द्वे अमावास्ये अत्रो एव खलु सा संपद्भवति ॥१२॥ ब्राह्मणम् ॥ स पौर्णमासानन्तरं इं
द्राय विमृधे ऽनु निर्वपति । तु नयथोध्येयनत अमावास्यानन्तरं अदित्यै चरुमनु निर्वपति । तन यथेष्टं येवं यज
ता । स यत्पौर्णमासेनेष्ट्वा इन्द्राय विमृधे ऽनु निर्वपति इन्द्रो वै यज्ञस्य देवताथैतदग्नीषोमीयं पौर्णमासं ह
विर्भवति तत्रानेजायत्वेति किं चन क्रियते । एतेना हास्यैनासं प्रदं हविर्भवत्यातन संज्ञो यज्ञो ऽयत्य विमृधत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(2)

ति सर्वा उ हि सृष्मेनाष्टः पौर्णमासेन हेति॥२ अथ य दामावास्येन इष्ट्वा अदित्यै वरु मनु निर्वपात्य षंवास्मा मा रा
जा देवानाम न्नं यद्वै द्रमाः स यात्रैष एता७ रात्रिं न पुरस्तान्न पश्चा दृदृशोत नि तदनेव हविर्न वतित नाप्र
तिष्ठितमित्यर्थ व दृ थि यदि दितिः स्य य मद्यास यं प्रतिष्ठितोता ना हास्यैत दुद्धेव हविर्न वत्यात न प्रतिष्ठितमेन
क्तु त यस्माद नु निर्वप यथ यस्मान्नानु निर्वपेत्॥३ स य त्पौर्णमासेनेष्ट्वा इन्द्राय विमृधे नु निर्वपति सं इन्द्रो न
यज्ञो सदिति सा वा वि य ज्ञ इं द्रस्यैव स य स्मा वा य ज्ञ इं द्रस्यैव ता ना हास्यैता स्य इ ७ हविर्न वात्यात न स्सेन्द्रो यज्ञ॥४
अथ य दामावास्येनेष्ट्वा अदित्यै वरु मनु निर्वपत्यामावास्यै वा अनु निर्वाप्ये पौर्णमासेन वा इन्द्रो वृत्रमहन्स्म
स्मा एतद् वैत्रं जघ्नुषे देवा एतद्धविरनु निरवपन्न्यदामावास्यै किं मन्नु निर्वाप्ये स्तु नु निर्वाप दिति तस्मान्नानु नि
2 र्वपेत्॥५ स य त्पौर्णमासेनेष्ट्वा अथान्यद्धविरनु निर्वपत्यामावास्येनेष्ट्वाथान्यद्धविरनु निर्वपति द्विषंतं७ हस

3

प

आ तृव्यं प्र स्तु वृ यात स्य पौर्णमासेन वा पौर्णमासी यजत आत्मामावास्येनामावास्या मस प न्नाहे वाच्या नु
पो बाधा श्रीर्न वति॥६॥ पौर्णमासेन वा देवाः पौर्णमासी यज मा ना २ आमावास्येनामावास्यां तिप्र एव पाप्मा
नं नम पा घ्नत ते प्रे प्रजा यंत स याहे वै विद्वान्पौर्णमासेन वा पौर्णमासी यजत आमावास्येनामावास्यो ति
प्र एव पाप्मान मप हत ते प्र प्रजा यात स य द नु निर्वाप दृ घा दक्षिणां ना दक्षिण ७ हविः स्या दिति ई
पूर्णमासत्या हीं वि षा दक्षिणाय दश्वाहार्य इति अनु निर्वाप्यस्या यास्तु दिति य्य ७ ब्राह्मण॥२ ताद्धैक इष्टिं प
वसन्ति। श्वो ना दात त्प त्र स्थं वा ह ता र नि ज्ञयि वा यो ता पव सं त्य थे न घ्नता स्तु दिति स य द्व ष्टही त ७ हविस्स
दिया त्प्रज्ञा त मे व त दोष व द्भत चर्या य त्सर्वे ष्क ई र्य दधि हवि रातैव नं त कुर्वंति प्रति प्रस्थं चंति वसां ष्टा नु
न र पाक कुर्वंति॥॥ ता न परा स्कं पर्श शाखया पा करोति॥ न घथे वादः प्रज्ञात मा मावास्य ७ हविरा रव मे वत द्ध्रु

(3)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽनववर्यं वानादाशा॥७॥ स तं गृहीत्वा हविरस्मुद्दियादितरथो तर्हि किंयीद्दतान वतं तुलाकुफली स्तता कृ वास्ये
णीया॥७॥ सस्नान स्नाय दाग्नेष्टाकपालं पुरोडाशा॥७॥ अपयति॥२॥ अथ यत्सांनाय्यं घृ। दुग्धं दधि तदिंद्राय प्रदात्रे यत्त
नीं दुग्धे विस्रावञ्चिपिविष्टाय तांस्तेंदुलांश्च तव रु॥७॥ अपयति व रुरु ह्येव स यत्र क्व च तेंदुलाना वपति॥१ तं घाद
वं भवति। एष वै सोमो राजा देवानामन्नं यच्चंद्रमास्स मतद्गुपेक्षी त्तम पारासी त्तमस्मा अग्निर्दाता ददातीं द्रः प्र
दाता प्रयच्छति तमस्मा इंद्राग्नी यज्ञैदत्त सेनं द्राग्नि त्यां दत्तेन यज्ञेन यज्ञातत्थय द्विस्त्रावञ्चिपिविष्टाय तियज्ञो
वै विष्णुरथ यच्छिपिविष्टायेति यत्तुपेक्षी त्तमपाराक्षी त्तं छिपितमिव यज्ञास्यक्तं भवति तस्माच्छिपिविष्टायेति तत्रो
यच्छकुयात्र द्दघान्नादक्षिणा॥७॥ हविः स्यादिति ह्याकुरथ यादेवानादियादयोपवसेत्॥४॥ ब्राह्मणी॥४॥ अ घ्रा मा वा
स्येति मन्यमान उपवसति। अथैष पथ्या द्दद्दरोस हिष्पदियः सा स यजमानस्य पशुन स्याच्चातत दपशव्य॥७॥ स्या ४

५
दप्राय श्चित्तिर्न्न तरत तस्मा दुहेत त्रुपावयं द मस्मादिति॥१॥ छायामुपसर्पति। एतानो हि तद्दुप तपदास्य त्तते अत्तु
चित मित्यतमुद्देवितरा च हाता॥२॥ रा द्दा श्चोंद्र मसहरति। चंद्रमा वै सोमो देवानामन्नं तौ पौर्णमास्यामति तुएवं तिस्म
परपाक्ततपर्ण्डषधीः प्रविशति पशावा वा अपत्रुषधीर दे तिताद नमेता॥७॥ रात्रिं पशुस्थाः सेन यति॥७॥ सोऽघा मावास्यति
मन्यमान उपवसति। अथैषपथ्याद्दद्दरोत घुजमाना यज्ञपथ्यादेति तदाङुः कथं कुर्यादिद्धायज्ञपथा घुजे
ता॥३॥ न यजेता॥३॥ इति यजेत्ता हैव न ह्यन्यदपकर्मणा भवति अः अवएविषज्याया नु दति स त्रा मा वा स्या विधेना वे
क्षा थेष्टिमनु निर्वपति तदहार्विवस्वावा॥४॥ तस्यै त्रीणि हवी॥७॥ षि भवंति। अग्नये पथिकृतेऽष्टाकपालं पुरोडाशम
मिंद्राय वृत्रघ्न एकादशकपालमग्नये वैश्वानराय द्वादशकपालं पुरोडाशं॥५॥ स यदग्नये पथिकृते निर्वप
ति। अग्निर्वि पथः कर्त्तास्ति यस्माद्देवादा यजमानो यज्ञपथादेति तमेनमग्निः पथ्यानमापाद यति॥६॥ अथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र

यदिंद्राय वृत्रघ्ने। पाप्मा वै वृत्रो यास्या त्रातव्रीयियचा तिष्ठति कल्याणात्कर्मणः साधोस्तमतदिंद्रेणैव वृत्रघ्ना पाप्मा
नं वृत्रं० हंति तस्मादिंद्राय वृत्रघ्ने।० अथ यदग्नये वैश्वानराय। द्वादशकपालं पुरोडाशं निर्वपति यत्र वा
इंद्रो वृत्रमहंस्तमग्निना वैश्वानरेण समदहत्तदस्य सर्वं पाप्मानं० समदहत्तथो एवैष एतदिंद्रेणैव वृत्रघ्ना
पाप्मानं वृत्रं० हत्वा तमग्निना वैश्वानरेण संदहति तदस्य सर्वं पाप्मानं० संदहति स यो हैवं विद्वानेतयेष्ट्या य
जते न हास्याल्पश्चन पाप्मा परिशिष्यते।० तस्यैष एव द्वादशमासिमेभ्यो नवैति। तपा० श्रु देवता यजति याः कामयते
ताया ज्यानुवाक्याः करोत्येवमाज्यभागाविव० संयाज्ये० तिसृधन्वं दक्षिणां ददाति। धन्वनावै श्यानं बाधात त
देतमेवितद्बाधते य त्रिसृधन्वं दक्षिणां ददाति।। ० दंडं दक्षिणां ददाति। दंडनो वै श्यानं बाधं ततहतामेवितद्बाधत
य दृंडं दक्षिणां ददात्येषा न्वादिष्टा दक्षिणा दद्यात्ववाश्चा मधून्यद्याद् तरा दक्षिणा स्त्रा सो यश्चश्च घेतसादेषा ५

प

पशज्ञेष्टिस्त्रयाश्चन स्तुद्रष्टो यजाते वा।।१ ब्राह्मणं।।५ आपो ह वा इदमग्ने सलिलमेवास ता अकामयंत कथं नु प्र
जायेमहीति ता अश्राम्यंस्ता स्तपोतप्यंत तासु तपस्तप्यमानासु हिरण्मयमांडं० संबभूवाजातो ह तर्हि संवत्स
र आस तदिदं० हिरण्मयमांडं यावत्संवत्सरस्य वेलां तावत्पर्यप्लवत।।१ ततः संवत्सरे पुरुषः समभवत्तु स
प्रजालँपति। स्तस्मादु संवत्सर एव स्त्री वा गौर्वा वडवा वा विजायते संवत्सरे हि प्रजापतिरजायत स इदं०
हिरण्मयमांडं व्यरुजन्नाह तर्हि काचन प्रतिष्ठास तदेनमिदमेव हिरण्मयमांडं यावत्संवत्सरस्य वेलासी
त्तावद्बिभ्रत्पर्यप्लवत।।२ स संवत्सरे व्याजिहीर्षत्स भूरिति व्याहरत्सेयं पृथिव्यभवद्भुव इति तदिदमंतरिक्ष
मभवत्स्वरिति सासौ द्यौरभवत्तस्मादु संवत्सर एव कुमारो व्याजिहीर्षति संवत्सरे हि प्रजापतिर्व्याहरत्।।३ स
वा एकाक्षरद्व्यक्षराण्येव। प्रथमं वदन्प्रजापतिरवदत्तस्मादेकाक्षरद्व्यक्षराण्येव प्रथमं वदन् कुमारो वदति।।४।। (६)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तानि वा एतानि । पंचाक्षराणि तान्पंच र्त्तूनकुरुत त इमे पंचर्त्तवः स एवमिमांल्लोकाञ्जातानभि संवत्सरे प्रजा
पतिरभ्युदतिष्ठत्तस्मादु संवत्सर एव कुमार उत्तिष्ठासति संवत्सरे हि प्रजापतिरुदतिष्ठत् ।५। स सहस्रायु
र्जज्ञे स यथा नद्यै पारं परापश्येदेवं स्वस्यायुषः पारं पराचख्यौ ।६। सोऽर्चञ्छ्राम्यंश्चचार प्रजाकामः । स आत्मन्ये
व प्रजातिमधत्त स आस्येनैव देवानसृजत ते देवा दिवमभिपद्यासृज्यन्त तद्देवानां देवत्वं यद्दिवमभिपद्यासृ
ज्यन्त तस्मै ससृजानाय दिवेवास तद्वेव देवानां देवत्वं यदस्मै ससृजानाय दिवेवास ।७। अथ योऽयमवा
ङ् प्राणः । तेनासुरानसृजत त इमामेव पृथिवीमभिपद्यासृज्यन्त तस्मै ससृजानाय तम इवास ।८। सोऽवेत्पाप्मा
नं वा असृक्षि यस्मै मे ससृजानाय तम इवाभूदिति तांस्तत एव पाप्मनाविध्यत्ते तत एव पराभवंस्तस्मादाहुर्नै
तदस्ति यद्दैवासुरं यदिदमन्वाख्याने त्वदुद्यत इतिहासे त्वत्ततो ह्येव तान्प्रजापतिः पाप्मनाविध्यत्ते तत एव परा

६

८

भवन्निति ।९। तस्मादेतदृषिणाभ्यनूक्तं न त्वं युयुत्से कतमच्चनाहर्न तेऽमित्रो मघवन्कश्चनास्ति मायेत्सा ते या
नि युद्धान्याहुर्नाद्य शत्रुं न नु पुरा युयुत्स इति ।१०। स यदस्मै देवान्त्ससृजानाय दिवेवास तदहरकुरुताथ यदस्मा
असुरान्त्ससृजानाय तम इवास तां रात्रिमकुरुत ते अहोरात्रे ।११। स ऐक्षत प्रजापतिः सर्वं वा अत्सारिषं य इ
मा देवता असृक्षीति स सर्वत्सरोऽभवत्सर्वत्सरो ह वै नामैतद्यत्संवत्सर इति स यो हैवमेतं संवत्सरं सर्व
त्सरं वेद यो हैनं पाप्मा मायया स्पृशति नादिन ।१२। सोऽभिभवत्यथ यमभिचरत्यभि हैवैनं भवति य एवमेतं
संवत्सरं सर्वत्सरं वेद ।१३। स ऐक्षत प्रजापतिः इमं वा आत्मनः प्रतिमामसृक्षि यत्संवत्सरमिति तस्मादा
हुः प्रजापतिः संवत्सर इत्यात्मनो ह्येतं प्रतिमामसृजत यद्वेव चतुरक्षरः संवत्सरश्चतुरक्षरः प्रजापति
स्तेनो हैवास्यैष प्रतिमा ।१४। ता वा एताः प्राजापत्यरभिदेवता असृज्यन्ताग्निरिन्द्रः सोमः परमेष्ठी प्राजापत्यः ।१५।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्राधा ८

ताः सहस्रायुषो जज्ञिरे । ता यथा नद्यै पारं परापश्येदेवꣳ स्वस्यायुषः पारं पराचख्युः ॥१५॥ ता अर्वन्त्सः आथ्य त्स्य
कामत एतं परमेष्ठी प्राजापत्यो यज्ञमपश्यद्यद्दर्शपूर्णमासौ ताभ्यामयजत ताभ्यामिष्ट्वा कामयताहमेवेदꣳ
सर्वꣳ स्यामिति स आपोऽभवदापो वा इदꣳ सर्वं ता यत्परमे स्थाने तिष्ठन्ति यो ह्यपीहाभिखनन्नप एवाभिविन्दत्य
रमाद्वा एतस्थानाद्वर्षति यद्दिवस्तस्मात्परमेष्ठी नाम ॥१६॥ स परमेष्ठी प्रजापतिं पितरमब्रवीत् । कामप्रं वा अहं
यज्ञमदर्शं तेन त्वा याजयानीति तथेति तमयाजयत्स इष्ट्वा कामयताहमेवेदꣳ सर्वꣳ स्यामिति स प्राणोऽभ
वत्प्राणो वा इदꣳ सर्वं प्राणो वै प्राणो योऽयं पवते स प्रजापतिस्तस्य दृष्टिर्यदिदं वै वेद स्थापयतीति यद्धि किं च प्राणि
स प्रजापतिस्तस्माद्देवमेतं प्रजापतेर्दृष्टिं वेद आविरिव हैव भवति ॥१७॥ स प्रजापतिरिन्द्रं पुत्रमब्रवीदन्
नेन त्वा कामप्रेण यज्ञेन याजयानि येन मामिदं परमेष्ठ्ययीयजदिति तथेति तमयाजयत्स इष्ट्वा कामयताह ७

प

मेवेदꣳ सर्वꣳ स्यामिति स वागभवद्वाग्वा इदꣳ सर्वं तस्मादाहुरिन्द्रो वागिति ॥१८॥ स इन्द्रोऽग्नीषोमौ भ्रातरावब्र
वीदनेन वां कामप्रेण यज्ञेन याजयानि येन मामिदं पिता प्रजापतिरयीयजदिति तथेति तावयाजयत्ता
विष्ट्वा कामयेतामावामेवेदꣳ सर्वꣳ स्यावेति तयोरन्नाद एवान्यतरोऽभवदन्नमन्यतरोऽन्नाद एवाग्निरभवद
न्नꣳ सोमोऽन्नादश्च वा इदꣳ सर्वमन्नं च ॥१९॥ ता वा एताः पञ्च देवता एतेन कामप्रेण यज्ञेनायजन्त ता यत्कामा
अयजन्त स आभ्यः कामः समार्ध्यत यत्कामो ह वा एतेन यज्ञेन यजते सोऽस्मै कामः समृध्यते ॥२०॥ ता इष्ट्वा प्रा
चीं दिशमपश्यन् । तां प्राचीमेवाकुर्वत सेयं प्राच्येव दिक् तस्मादिमाः प्रजाः प्राच्यः सर्पन्ति प्राचीꣳ ह्येताम
कुर्वीता । पिनामितः ऊर्ध्वीमहीति तामूर्ध्वामकुर्वत मां खल्वूर्ध्वां पश्येमेति सासौ द्यौरभवत् ॥२१॥ अथ दक्षि
णां दिशमपश्यन् । तां दक्षिणामेवाकुर्वत सेयं दक्षिणैव दिक् तस्मादु दक्षिणत एव दक्षिणाग्नेः पतिष्ठन्ते द

(7)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षिणातास्ववाजंति दक्षिणा॥ ते तामकुर्वीतापि नामितः ऊर्ध्वी महीतिर्ते लोकमकुर्वतेमं खलु लोकं पश्चप
श्यति तदिदमंतरिक्षमजव दक्षिण लोकः सायथा हि वयं प्रतिष्ठा विरस्मिंल्लोके पृथिव्येव मुदे हि विश्वा प्रतिष्ठा वि
रसुष्मिंल्लोक इदमंतरिक्षं॥ स यदिह सन्नमुं लोकं न पश्यति तस्मादाहुः परोक्षमसौ लोक इति॥२२ अथ प्रती
चीं दिशमपश्यन्। ता मा शाम कुर्वत तस्माद्यस्माद्धृ आविंदत एतामेवातन दिशमपश्यत्॥ ते तामकुर्वीतापि
नामितः ऊर्ध्वी महीतिता॥ श्रियमकुर्वतेमां खलु श्रियं पश्यामतिं स यैं पृथिव्यन्नवद्वीवङ्श्रियं तस्माद्योस्येन्नमि
ष्टं विंदत स एव श्रेष्ठो भवति॥२३ अथोदीचीं दिशमपश्यन्। तामुपोऽकुर्वतापि नामितः ऊर्ध्वी महीतिते धर्म
मकुर्वत धर्मो वा आपस्तस्माद्यदेमं लोकमाप आगच्छंति सर्वमेवेदं यथाधर्मं भवत्यथ यदा वृष्टिर्न भवति
बलीयानेव तर्हि बलीयस आददते धर्मो ह्यापः॥२४ ता वा एता एकादश देवताः पंच प्रयाजा आज्यभा

गौ स्विष्टकृत्त्रयोऽनुयाजाः॥२५ ता एकादशाहुतयः। एताभिर्वा आहुतिभिर्देवा इमाँल्लोकानजयन्नेता
दिग्भ्यस्तथो एवैष एताभिराहुतिभिरिमाँल्लोकाञ्जयत्येता दिशः॥२६ स तस्यां वा अंतरदिशः। त एव चत्वारः पत्नी
संयाजाः अवांतरदिशो विदे वा चत्वारः पत्नीसंयाजा इति यज्ञ यन्नवांतरदिश एवैष एतेर्जयति॥२७ अथे
डा॥ अन्नाद्यामेवैतया देवा अजयंस्तथो एवैष एतयान्नाद्यमेव जयत्येषा न्वादेवत्रा दर्शपूर्णमासयोः सं
पत्॥२८ अथाध्यात्मं। पंचामे पुरुषे प्राणा स्नातवर्जं चक्षुस्त एव पंच प्रयाजाश्चक्षुषी वा आज्यभागौ॥२९ अयमे
वावाङ् प्राणः स्विष्टकृत्। स यत्तमन्त्यं देवतरां यत्रा आहुतिभ्यो जुहोति तस्मादेतस्मात्प्राणात्सर्वं प्राणा बीभ
त्सेत यः स्विष्टकृतमावीपा॥ हविषा॥ समवद्यति तस्मात्किं च किं च विमान्प्राणानाप्यद्यत एतमेव तत्र सैवं
॥ समवैति॥३० त्रीणि शिश्नानि त एव त्रयोऽनुयाजाः स यो यं वर्षिष्ठमनुयाजस्तदिदं वर्षिष्ठमिव शिश्नं तं वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५१

अनवानन्याद्वियाज्ञ्याथोहास्यैतदमृ अंतवतीति ॥ २१ ॥ सा वै समंत दवान्या नुा एकं ७ ह्येतस्य पर्वयिद्पुर्व
फाउंच्यामूत्सोविवतिष्ठेल्लांम्छतबा तस्मादेतदुअ तिष्ठति प घातिबतस्मा सन्तदवान्यात् ॥ २२ ॥ द्वौबाहू वाज
हूत एवव वारः पत्नीसंयाजाः प्रति छायमेव प्राणइडाम त्रोनाथेोजुहोतियसा पूदग्मेव तस्मादयमनव
तृप्तः प्राणः ॥ २३ ॥ अस्थेव याज्यानुवाक्याः मा ७ स ७ हविस्तन्मितं छंदोयघाज्यानुवादं क्यास्ततस्मादु समा
वीत्यवास्थीनि मघृत अरूप तअतर्व त्यथय कूर्मय इव वहविर्ष्ट कता तिक्नीयइव चतस्मादु मा ७ सान्येव
मेधातामेधेति मा ७ सानि हरूपतः हरूपंतितिनोतनयज्ञेनयो कामयात दवतो नो यजतियस्यैह चित्र
वति ॥ २४ ॥ तावा एताः अनपोर्ब्बे यो आकृताया अवंतिस यावेतासा मा पाद्रु रयथै कर्मणं ७ शृणियात्प्रा
णंवानिर्दिएपादर्वं तदन्यान्यव हवी ७ ष्युपवाक्रियांतु पवक्रियांत ॥ २५ ॥ ता वा एताः षोडशाकृताया अवंति –

९

५

षोडशाकलोवैपुरुषः पुरुषोयज्ञस्तस्मात्षोडशाकृतायाअवंति ॥ २६ ॥ ब्राह्मणं ॥ ६ ॥ तद्वा आदात्रातापायनउवाताय
दिनाश्नातिपितृदेवत्यो भवतियघ्नश्नाति देवानत्यश्नातीतितदाहैतमश्नीयादितिनत्वेवाचापयेति ॥ १ ॥ सयदियत्पा
श्यात्तृषधीरश्नाति ॥ ऊराडाराद्यामेधमश्नातियघारण्याऽऽषधीरश्नातिबर्हिषामेधमश्नातियदिवानस्पत्यमश्ना
तीध्मस्यमेधमश्नातियदिपयः पिबतिसान्नाय्यस्यवाज्यस्यवामेधमश्नातियघपः पिबति प्रणीतानांमेधमश्नाति
यदिनाश्नातिपितृदेवत्योभवति ॥ २ ॥ तदाहुः । किमयनमितिस्त्रय ७ हो वा लरात्री अग्निहोत्रेजुहुयात्सयद्वा
प्राश्नातितनापितृदेवत्यो भवत्याहुतिर्वा एषायद् वेतामालीमानाहुतिं जुहोतितनारातषांमक्षं नो
नाश्नाति ॥ ३ ॥ रात ह वैरात्री । सर्वा रात्रयः समवयंतिया आधस्यमाणपस्तस्य रात्रयस्ताः सर्वाः । पोर्णमासी ७ समव
यंतिया अपक्षीयमाणपक्षस्य रात्रयस्ताः सर्वा अमावास्या ७ समवयंतिसयोहैवं विद्वानमायस्युपवसत्येजुहोतिसर्व

९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दाहैवास्यैष ७ कृतं भवति॥४॥ ब्राह्मणं॥७॥ देवाश्च वा असुराश्च । उभये प्राजापत्याः पस्पृधिरे ततोऽसुरा अतिमाने
नैव कस्मिन्नु वयं जुहुयामेति स्वेष्वेवास्येषु जुह्वतश्चेरुस्ते अतिमानेनैव परा बभूवुस्तस्मान्नातिमन्येत पराभवस्य हि
तन्मुखं यदतिमानः॥ अथ देवाः । अन्योन्यस्मिन्नेव जुह्वतश्चेरुस्तेभ्यः प्रजापतिरात्मानं प्रददौ यज्ञो हैषामास य
ज्ञो हि देवानामन्नं॥२॥ स देवेभ्य आत्मानं प्रदाय । अथैतमात्मनः प्रतिमामसृजत यद्यज्ञं तस्मादाहुः प्राजापति
र्यज्ञ इत्यात्मनो ह्येतं प्रतिमामसृजत॥३॥ स एतेन यज्ञेन । देवेभ्य आत्मानं निरक्रीणीत स यद्व्रतमुपैति यथैव त
त्प्रजापतिर्देवेभ्य आत्मानं प्रायच्छदेवमेवैष एतद्देवेभ्य आत्मानं प्रयच्छति तस्माद्व्रतं यत एवैतां ७ रात्रिं वि
वशिष्यद्यथा हविषा चरेदेवं ७ हविर्ह्येष देवानां भवति॥४॥ अथ यद्यज्ञं तनुते । यज्ञेनैवैतद्देवेभ्य आत्मानं
निष्क्रीणीते यथैव तत्प्रजापतिर्निरक्रीणीतैवमथ यद्धविर्निर्वपति हविषैवैतद्यज्ञं निष्क्रीणाति हविरनुवाक्य ॥१०

यानुवाक्यामवदानेनावदानं याज्यया याज्यां वषट्कारेण वषट्कारमाहुत्या तस्या आहुतिरेवानिष्क्रीता भवति प्रस
यथाय प्रत्नमिद्धिः एवमस्यैष यज्ञानां भवत्याहुतिमेवान्वाहार्येण निष्क्रीणाति न घा दतद्धीनं यज्ञस्यान्वाहरति त
स्मादन्वाहार्यो नामैव स्वाहास्यैष सर्व एव यज्ञो निष्क्रीतो भवत्येष हवि यजमानस्यामुष्मिँल्लोक आत्मा भवति य
ज्ञः सह सर्वतनूरेव यजमानो अमुष्मिँल्लोके संभवति य एवं विद्वान्निष्क्रीत्या यजते॥ ब्राह्मणं॥७॥ त्रिर्ह वै
पुरुषो जायते एतन्न्वेव मातुश्चाधि पितुश्चाग्रे जायतेऽथ यं यज्ञ उपनमति स यद्यजते तद्द्वितीयं जायतेऽथ यत्र
म्रियते यत्रैनमग्नावभ्यादधति स यत्ततः संभवति तत्तृतीयं जायते तस्मात्त्रिः पुरुषो जायत इत्याहुः॥
तावा एता एकादश सामिधेनीरन्वाह दश वा इमे पुरुषे प्राणा आत्मैकादशो यस्मिन्नेते प्राणाः प्रतिष्ठिता एता
वान्वेव पुरुषस्यादनं जनयत्यथ यद्द्वादशी सामिधेनी भवत्याः सा प्रतिष्ठा तादनं जनयित्वा प्रतिष्ठापयति २ नव प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वस्य व्याप्तत्यै । नवा अमी पुरुषे प्राणास्तदेनं द्वितीयं जनयत्याश्रावणं प्रत्याश्रावणं सा प्रतिष्ठा यद्य दे
वादः स्पृष्टौ ज्ञान्मा घारेणेनादेवं नं तृतीयं जनयति पत्नीसंयाजा एव नत्र प्रतिष्ठा ॥३॥ त्रिर्हि वै पुरुषो जायते एवमे
वैनमेतद्यज्ञात्त्रिर्जनयति ताभ्यामेकादशानां त्रिः प्रथमामन्वाह त्रिरुत्तमां ॥४॥ ताः पंचदश सामिधेन्यः आघारावाघारौ पं
च प्रयाजा इडा त्रयोऽनुयाजाः सूक्तवाकश्च शंयोर्वाकश्च तास्त्रयोदशाहुतयो याद्देवादः पत्नीसंयाजेषु सं
प्रतिक्रामति समिष्टयजुश्च ॥५॥ ताः पंचदशाहुतयः ताः सो पंचदशानामाहुतीनामेता अनुवाक्या एताः पंचदश
सामिधेन्य एतासामनुवाक्यानामेता याज्या य एवात्र मंत्रो याज्या निगदस्तद्याज्यारूपमात्मनो हास्यैता आहु
तयोऽनुवाक्यवत्यो भवन्ति य एताभिः सामिधेनीभिरेताभिराहुतिभिरेता अनुवाक्यायाज्यवत्य आहुतिभिर्य
जन्ते वेति ॥६॥ ब्राह्मणम् ॥५॥ गायत्रीमनुवाक्यामन्वाह । त्रिपदा वै गायत्री त्रय इमे लोका इमानेवैतल्लोका

११

प

न्द्वाः प्रत्यष्ठापयन् ॥१॥ अथ त्रिष्टुप्सा देवता याऽऽराद्धयस्य यद्वै याऽऽहवम आविलोका इमा आदेवता एवमु हैक आ
विलोकास्ताश्चादेवता यष्टुता देवता याऽऽराद्धयते ॥२॥ अथ ब्राह्मणैव पराधमगछत्पराधं ज त्वै न्तत कथंत्विमां लो
कौ प्रत्यवेयामिति तद्वास्यामेव प्रत्यवेक्षूपणावेव नाम्नाव सयस्य कस्य च नामास्ति तन्नामय त्र्य अपि नाम मन्त्रा
स्त्रियच्छन्द्रूपेणेदं रूपमिति तद्रूपामेतावद्वा ताजयति ॥ चतुष्पदा वै त्रिष्टुब्वतुष्पादाः पशवस्तत्पत्स्मानेव
तादेष्वलोकेषु प्रतिष्ठितेषु देवाः पश्यष्ठापयन् ॥४॥ घ द्वारा वषट्कारः । द्विपाद्वै पुरुषस्तत्पुरुषामेवैतद्विपाद
मेषु पशुषु प्रतिष्ठितेषु देवाः प्रत्यष्ठापयन् ॥५॥ सायं द्विपात्पुरुषः । पशुषु प्रतिष्ठित एव मा मावेष एतं लोकान्प्र
तिष्ठापयति लोकेषु प्रतिष्ठितेषु पशून्प्रतिष्ठापयति पशुषु प्रतिष्ठितेष्वात्मानं प्रतिष्ठापयत्येवमेष पुरुषः प
शुषु प्रतिष्ठिता य एवं विद्वान्यजति ॥६॥ अथ यद्वषट्कृते जुहोति । एष वै वषट्कारो य एष तपति स एष मृत्युस्तदेन

11

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुपरिष्टान्मृत्योः संक्रामति तादनमाता जनयति । स एवैतं मृत्युमतिमुच्यते । यज्ञो वा अस्यात्मा भवति न यज्ञ एवत्वै
तं मृत्युमतिमुच्यते ए ता नाहास्य सार्वयज्ञ क्रतव एतं मृत्युमतिमुक्ताः । ५ अथ या अमृता आकृतिं जुहोत्येषा दैवास्य
स्याकृतिरमुष्मिंल्लोक आत्मा भवति स यदेवं विद्वानस्माल्लोकात्प्रैत्यथैनामेषाकृतिरेतस्यापृष्ठेन्नन्त्याक्क यत्वे ह्यहं वै
त इहात्मास्मीति तं घदाद्ध यति तस्मादाकृतिर्नाम । ६ ॥ ब्राह्मणम् ॥ ब्रह्म वा इदमग्र आसीत्तद्देवानसृजत तद्देवान्सृष्ट्वै
षु लोकेषु व्यारोहयदस्मिन्नेव लोकेऽग्निं वायुमंतरिक्षे दिव्येव सूर्यं । अथ ये अत ऊर्ध्वा लोकास्तद्या अत ऊर्ध्वा देवतास्तेषु
ता देवता व्यारोहयत्स यथा ह वै म आविर्लोका इमाश्च देवता एवमु हैव त आविर्लोकास्ताश्च देवता येषु ता देवता व्या
रोहयत् । २ अथ ब्रह्मैव परार्धमगच्छत्तत्परार्धं गत्वैक्षत कथं न्विमांल्लोकान्प्रत्यवेयामिति तद्द्वाभ्यामेव प्रत्यवैद्रूपेण
चैव नाम्ना च स यस्य कस्य च नामास्ति तन्नाम यस्यो अपि नाम नास्ति यद्वेद रूपेणेदं रूपमिति तद्रूपमेतावद्वा इदं या

१२

५

रूपं चैव नाम च ३ ते हैते ब्रह्मणो महती अभ्वे स यो हैते ब्रह्मणो महती अभ्वे वेद महद्धैवाभ्वं भवति । ४ ते हैते
ब्रह्मणो महती यक्षे स यो हैते ब्रह्मणो महती यक्षे वेद महद्धैव यक्षं भवति तयोरन्यतरज्ज्यायो रूपमेव यद्ध्यपि
नाम रूपमेव तत्स यो हैतयोर्ज्यायो वेद ज्यायान्ह तस्माद्भवति यस्माज्ज्यायान्बुभूषति । ५ मर्त्या ह वा अग्रे दे
वा आसुः स यदेवैते ब्रह्मणापुरथामृता आसुः स यं मनसा आवारयति मनो वै रूपं मनसा हि वेदेदं रूपमि
ति तेन रूपमाप्नोत्यथ यं वाचावारयति वाग्वै नाम वाचा हि नाम गृह्णाति तेन नामाप्नोत्येतावद्वा इदं सर्वं या
वद्रूपं चैव नाम च तत्सर्वमाप्नोति सर्वं वा अक्षय्यमेतावानु हास्याक्षय्यः सुकृतं भवत्यक्षय्यो लोकः ६ तद्वा अर्ध
मासेष्ट्या मिष्ट्वानुघाता । यथा तद्दृष्टिस्त्वा यज्ञः प्रारोवतं यथा तनुततघज्ञं तत्वानो देवी नांधवविपनिषदु स्नेह
स्मसंनिदधती देवा अत्परीरिचन्निदमृनमङ्क्लितिसृ दैयदेषां यज्ञः संतस्थे येनां स्वदृश्यांवकुरिदं वा अत्परी ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५

रिचातदनूनमकर्त्रीति ७ सयदतिरिचयांचक्रुः। यथा गिरिरेवं तदासाप्प यद्ध नैव चक्रुर्यथा श्वभ्राः प्रदरा एवं तदासा
सयत्र शोयाराहा तदति ह शाति यज्ञ नमश्च तउपवयज्ञस्य शिवसंतिष्ठस्वा स्विष्टमसंतिष्ठस्वेति स यदतिरिचयति
तेनमस्कारेण शमयत्यर्प्यर्थ हूनं कारात्कप तितितेन तदनूनं भवति यज्ञस्य शिवसंतिष्ठस्वेति यादि यज्ञस्यानूनाति
रिक्तं तछिवं तेन तदु भय ८ शर्मं यतिस्विष्टमसंतिष्ठस्वेतीयादि यज्ञस्यानूनातिरिक्तं तत्स्विष्टं तेनातदु भय ८ श
मयत्येवमुहाश्चैतेन यज्ञेनानूनातिरिक्तेनेष्टं भवति य एवं विद्वानेव मस्ति ह शाति तस्मादेवमेवाभिमृशेत्तेद
तगंधर्वाश्रासुः शूर्प्यं यवमानस्तपिरुद्धानवा न्धानां भर्वा नू ९ ब्राह्मणं ॥१॥ एषवै पूर्णमासः। य एष तपत्यहर
हर्ह्येवैष पूर्णश्चैष एव दर्शो यद्वंद्रमा ददृश इव ह्येषः ॥१॥ अथोऽस्तरयाऽकुः। एष एव पूर्णमासो य एष चंद्रमा एतस्य ह्य
नुकरणं पौर्णमासी स्यादित्यातस्थैष एव दर्शो य एष तपति ददृश इव ह्येषः ॥२॥ इयमेव पूर्णमासः। पूर्णैव ह्ययम

१३

च्यथाकनाच्य दर्शपूर्णमासाविष्टौ भवत इति स यं मनसाऽऽघारयति मानाविपूर्णमासोऽन पूर्णमासं यज
च्यथ यं वाचाऽऽघारयति वाग्वै दर्शोऽस्मिन्नादर्शं यजत्येतानाहास्य दर्शपूर्णमासाविष्टौ भवतः ॥७॥ ताद्वाकच
हूनिर्वपंति। पौर्णमास्या ८ सरस्वात मावास्या या ८ सरस्वत्या एतत्प्रयतं दर्शपूर्णमासो यजमान इति व
दंतस्तदुत थानकुर्यान्मानाविसरस्वाञ्चाकोलरस्वतीस यदेवतावाघारावाघारयति तादेवास्पदर्शपूर्ण
मासाविष्टौ भवतस्तस्मादेतौ बहून निर्वपेत् ९ तदाहुः। आहूत्रीवा एष भवति यो दर्शपूर्णमासाभ्यांय
जते पौर्णमासेनहीन्द्रोवेदामावास्येनयहत्पर्ह्याऽऽमावास्येनेष्ट्वा वि ह पुनः पौर्णमासेनयहत इति स आहू
र्त्रैवासुं लोकमेति यदासुं लोकमेति कथमनाहूत्री भवतीति। स यद्देवता उभयत्राघारावाघारयति
तादेवास्य दर्शपूर्णमासा संतिष्ठते सम ८ हितायारव दर्शपूर्णमासायारथामुं लोकमेति तथानाहूत्री

१४

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५

सा व वा घोऽहोरात्रीदृद्ग्शऽवह्यासोघोः।३।रात्रिरेवाप्तोर्याममाः।।पूर्वे वदीय।८।रात्रिरदारेवदर्श्रौदद्वशऽवदी
दमहारषानुदेवत्रा दर्शहिपूर्णमासयोर्य्यामा।८। मा।४। अथाध्यात्मं।उदान एव पूर्णमा उदानेन ह्ययं पुरुषः पूर्य
तऽवप्राण एव दर्शौदृद्ग्श एव ह्ययं प्राणस्त्रदताववन्नादं स्यान्नप्रदेव दर्शपूर्णमासौ।५। प्राण एवान्ना
दः प्राणेन हीदमन्नमद्यत उदान एवान्नप्रद उदानेन हीदमन्नं प्रदीयते सा यो हैतावन्नादं चान्नप्रदं च
दर्शपूर्णमासौ वेदान्नादो हैव भवति प्र हास्मा अन्नाद्यं दीयते।६। मन एव पूर्णमाः पूर्णमिव हीदं मनो वागे
वदर्शौदृद्ग्शऽव हीयं वाक्तादेतावध्यात्मं प्रत्यक्षं दर्शपूर्णमासौ स यदु पवमस्य व्रातापा यनीयमन्त्रा
तितानेतावध्यात्मं प्रत्यक्षं दर्शपूर्णमासौ प्रीणाति यज्ञेन प्रातर्हूयेत।७।तदाहुः यन्न पूर्णमासायति ह
विष्ट्यातनदर्शायेति हविष्ट्यात नपूर्णमासायानुब्रूहि नदर्शायानुब्रूहि न पूर्णमासं यजन दर्शं यज

५

नवति।१०।ब्राह्मणं।।२।।प्रथमः प्रपाठकः समाप्तः।। ।।कण्डिका।।१९।।ब्रा।। अपि ह वा एतर्हि। देवस्याश्वमेधमालभं
ते तदाहुः प्रात्यस्ताश्वमेधऽनीतरऽन्यूनं।८।सतद्वा एष एवाश्वमेधीयं यद्दर्शमाः।।१।।तदाहुः।पादपादश्वस्यामेध्या
स्याज्ञतिं जुहुतीति स यत्सायं प्रातरग्निहोत्रं जुहोति द्वे सायमाहुती जुहोति द्वे प्रातस्ताश्च तस्य आहुत
यश्चतुष्पाद्वा अश्वस्तदस्य पादपदे एवाहुतिं हुता भवति।२।तदाहुः।विवृत्ते अश्वस्याष्टिं निर्वपन्तीत्येष वे
ष्मा मारा जादेवानाम लंयद्दर्शमाः स यात्रेषएता।८।रात्रिं न वसेत्स्मात्पश्चाद्दृशेतदि मं लोकमागच्छ
ति सोऽस्मिंल्लोके विवर्ततातु।३। स यदमावास्यायां न यजते विहतं एवास्य तदिष्टिं निर्वपत्यथ यत्पौर्णमा
सं न यजते अश्वमेधमेवितदालमते तमालभ्यादावश्यः प्रयच्छति संवत्सरं वा इत्तरमश्वमेधमालभं त
एषा वै मासः परिप्लवमानः सं वत्सरं कारातिततच्छसंवत्सरसंवत्सर एवाश्वमेध आलब्धो भवति।४ ते वा

14

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋक्षघाटी

एतौ। मासिमास्येवाश्वमेधमालभेत सयो हवै विद्वानग्निहोत्रं जुहोति दर्शपूर्णमासाभ्यां वयजातमा
सिमासि हि वास्याश्वमेधेनेष्टं भवत्येतद्धोताग्निहोत्रं वदर्शपूर्णमासौ वाश्वमेधमनिर्मिपद्यात ५ ब्रा
ह्मणं॥ १ शिरो ह वा एतद्यज्ञस्य यत्प्रणीताः। स यत्प्रणीताः प्रणयति शिर एवैतद्यज्ञस्य संस्करोति सविद्या
च्छिर एव म एतत्संस्क्रियत इति। १ प्राण एवास्य ध्रुवः। प्राणेन हीदं सर्वं सिद्धं यत्प्राणत्तृप्तिमिषध्यादजति स
विद्यादहमिवेषमिध्य इति। २ अनूकमेवास्य सामिधेन्यः तस्मात्ता अन्वाह्न्याः संततमेवानि वमेनुब्रूदीति संतत
मिव हीदमनूकं मनस्येवास्य वाक्याघारौ सरस्वांश्च सरस्वती च स विद्यान्मनसैव मे वाक्याघारौ सरस्वांश्च
सरस्वती च भवति। ३ पञ्च प्रयाजाः। इम एवास्य ते शीर्षण्याः पञ्च प्राणा मुखमेवास्य प्रथमः प्रयाजो दक्षि
णा नासिका द्वितीयः सव्या नासिका तृतीयो दक्षिणः कर्णश्चतुर्थः सव्यः कर्णः पञ्चमोथ यच्चतुर्थे प्रया। १५

०स मानयति तस्मादिदं ७ श्रोत्रं मन्त्रतः संसृष्टं सं चक्षुषी आज्यभागौ स विद्याच्चक्षुषी एव म एते इति। ४ अथ प
य आग्नेयः पुरोडाशः। अयमेवास्य स दक्षिणो बाहुर्हृदयमेवास्योपा५शुयाजः स यत्तेनोपा५शु चर
ति तस्मादिदं गुहेव हृदयम्। पञ्च अथ यो अग्नीषोमीयः पुरोडाशः। अयमेवास्य स उत्तरो बाहुरैन्द्रवास्तोनाय
मं तरा ५ स मेवास्य स्विष्टकृद्विषं प्राशित्रं ६ स यत्प्राशित्रमवद्यति। यथैवैतत्प्रजापतेरविद्धं निर
कृन्तन्नेवमेवैतस्यैतद्यद्विष्टं तं यद्ग्रथितं यत्क्रूरं तन्निष्कृन्तति स विद्याद्यथैवैतत्प्रजापतेरविद्धं
निरकृन्तन्नेवमेव मह्यं यद्विष्टं तं यद्ग्रथितं यत्क्रूरं तन्निष्कृन्ततीति। ७ उदरमेवास्येडा तद्यथैवाद
इडायाः समवद्यत्येवमिदं विश्वरूपमन्नमुदरं समवधीयते। ८ त्रयोनुयाजाः। इम एवास्य ते
वाचस्त्रयः प्राणा बाहू एवास्य सूक्तवाकश्च शंयुवाकश्च चत्वारः पत्नीसंयाजास्तस्य ते प्रतिष्ठा ऊरू

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१५

धावष्टौ वैतन्नोषधेपादावेवास्यैतमिष्टयजुः ।१९ ता एकविंशतिराहुतयः । द्वा वाघारौ पञ्च प्रयाजा द्वा
ऊप वाज्यभागावाग्नेयः पुराडाशस्तदुपांशु अग्नीषोमीय उपांशुयाजोऽग्नीषोमीयः पुराडाशोऽग्निः स्विष्टकृ
दिडा त्रयोऽनुयाजाः सूक्तवाकः शंयोर्वाक आथयाद्देवाः पत्नीसंयाजेषु संप्रतिष्ठास्तत्तिस मिष्टय
जुश्वा ॥१० ता एकविंशतिराहुतयः । द्वादश वै मासाः पंचर्तवस्त्रय इमे लोकास्तद्वि एकविंशतिरे
ष एव एकविंशो य एष तपति सैषा गतिरेषा प्रतिष्ठा तदेतां गतिमेतां प्रतिष्ठां गच्छति ॥११ तद्धैतस्मा
रुणिराह । अर्धमासशो वा अहममुनादित्येन सलोकतामश्नुवे दर्शपूर्णमासयोः संपदं विदे
ति ।१२ तदाहुः । आत्मयाजी श्रेयाँ३ न्देवयाजी३ इत्यात्मयाजीति ह ब्रूयात्स ह वा आत्मयाजी यो वेदे
मानन्नो गं संस्क्रियत इदं मेऽनेनाङ्गमुपधीयत इति स यथाहिस्त्वचो निर्मुच्येतैवमस्मान्मर्त्याच्छरी

१६

प

रात्पाप्मनो निर्मुच्यते स ऋङ्मयो यजुर्मयः साममय आहुतिमयः स्वर्गं लोकमभिसंभवति ॥१३ अथ ह
स देवयाजी यो वेद देवानेवाहमिदं यजे देवान्सपर्यामीति स यथा श्रेयसे पापीयान्बलिं हरेद्वैश्यो
वा राज्ञे बलिं हरेदेवं स ह न तावन्तं लोकं जयति यावन्तमितरः ॥१४ ब्राह्मणं ॥ ५ संवत्सरो यज्ञः । स
य्याह वै संवत्सरो यज्ञ इति विद्यात्ता हैवास्य संवत्सरस्येष्टं भवत्यथो यत्किंच संवत्सरे क्रियते सर्वं हैवा
स्य तदाप्तमवरुद्धमभिजितं भवति ।१ ऋतवस्त्विजः । स य्याह वा ऋतव ऋत्विज इति विद्यात्ता हैवास्यर्तू
नामिष्टं भवत्यथो यत्किंच ऋतुषु क्रियते सर्वं हैवास्य तदाप्तमवरुद्धमभिजितं भवति ।२ मासा हवीं-
षि । स य्याह वै मासा हवींषीति विद्यात्ता हैवास्य मासानामिष्टं भवत्यथो यत्किंच मासेषु क्रियते स
र्वं हैवास्य तदाप्तमवरुद्धमभिजितं भवति ।३ अर्धमासा हविष्पात्राणि । स य्याह वा अर्धमासा हविष्पा

16

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्नीति त्रिवदांत हि वास्यार्द्धमासा नामिष्टं तव यथो यत्किं वार्द्धमासेषु क्रियात सर्वं ७ हे वास्य तदाप्तम वरु
द्धमभिजितं भवति ४ अहोरात्रे परिवत्सरी । स याद वा अहोरात्रे परिवत्सरी इति त्रिवदांत हि वास्याहोरा
त्रयोरिष्टं तवत्यथो यत्किं चाहोरात्रयोः क्रियत सर्वं ७ हे वास्य तदाप्तमवरुद्धमभिजितं भवति ५ इय
मेव प्रथमा सामिधेनी । अग्निर्द्वितीया वायुस्तृतीया चरिरंतरुथी द्यौः षंचथा दिशः षष्ठी चैंद्रमाः सप्तमी
मनोष्टमी वाङ्नवमी तपो दशमी ब्राह्मेकादशे ताहि वाइद ७ सर्वं ७ समिधत एता हि रिद ७ सर्वं ७ स
मिद्धं तस्मात्सामिधेन्यो नाम ६ स विविः प्रथमामं चाह । सय त्प्रथमम न्वाह प्राचीं तन दिशं जयति यद्द्वि
तीयं दक्षिणां तन दिशं जयति यत्तृतीयम प्रतीमावातुन दिशं जयति ७ त्रिवीवाकुमाम न्वाह । सयत्प्र
थमम न्वाह प्रतीचीं तन दिशं जयति यद्द्वितीयमुदीचीं तन दिशं जयति यत्तृतीयमिमामेव तेन प्रति

१७

प

ष्ठां जयत्येव मुत्तानिरिमांल्लोकान्नु यथैता दिशः ८ सत मेव पूर्व आघारः सत्पमुत्तरावहवा न्नतसत्पेप
धे यो यत्किं च तं सत्य ज्योजय ७ सर्वं ७ हि वत जयति ९ त्रिषिरव प्रथमः प्रयाजः अनूप चितिः तृतीया
दि
यज्ञास्तृतीया ब्रह्मवर्चसं चतुर्थो न्नाद्यं पंचमः १० स प्रथमं प्रयाजमत्तुमं त्र्यात । त्रिषिमान्भूयासमित्यप
चिति मान्भूयासमिति द्वितीयं यशस्वी भूयासमिति तृतीयं ब्रह्मवर्चसी भूयासमिति चतुर्थमन्नादा भूया
समिति पंचमं त्रिषिमान्हवाऽपचितिमान्यशस्वी ब्रह्मवर्चस्यन्नादो भवति य एवमेतद्वेद ११ एतद्वस्म
वैतद्विद्वानाहाश्वेताकेतुरारुणेयः क ७ ष्विदवापरीक्षु महानाग मिवाभिस ७ सारं दिदृक्षितारा य
एवमेतत्प्रयाजानां यशो वेदितेति १२ सतमेव पूर्व आज्यभागः सतविथ्ठत्तरावहवावे सत्तं वन्नविथ्य
चरुं प्रेथो यत्किं च सतन्सत्वविथ्यतात्र जय्य ७ सर्वं ७ हे वतज्जयति १३ ब्रह्मा वैश्वेयः प्रुरोडाशः सयो

(17)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दावेब्रह्माग्नेयः प्रयाजानामाद्य इति विदा वह ब्रह्म रुध्येयो य क्विं च ब्रह्मणा जय्य ७ सर्व ७ हैव तज्जयति ॥१४
क्षत्रं सुपा ७ सु याजः ॥ स यो ह वै क्षत्रं सुपा ७ सुयाज इति विदावह क्षत्र ७ रुध्येयो य क्विं च क्षात्रेण जय्य ७
सर्व ७ हैव तज्जयति तद्यदु पा ७ सुयाजं ऊर्ध्वात्पाकनाक तस्मादुर्श्वेशो पा ७ सु यच्छ त्रायायच्छाता ॥१५ वि
ड्नराः प्रयाजाः ॥ स यो ह वै विड्नराः प्रयाजा इति विदावह विश ७ रुध्येयो य क्विं च विशा जय्य ७ स
र्व ७ हैव तज्जयति तद्य दाग्नेयश्च प्रयाजाश्च उपा ७ सुयाजश्च प्रावेशिरवतस्तस्मादुते ब्रह्म च क्षत्रं च वि
शि प्रतिष्ठिता ॥१६ राष्ट्र ७ सौ नाय्यो ॥ स यो ह वै राष्ट्र ७ सौ नाय्यमिति वेदावह राष्ट्र ७ रुध्येयो य क्विं
च राष्ट्रेण जय्य ७ सर्व ७ हैव तज्जयति तद्यत्सौ नयीत्पाकानि केतस्माद्भिन्द्राष्ट्र ७ सं वि तिष्ठि वा ॥१७ तपः
स्विष्टकृत् ॥ स यो ह वै तपः स्विष्टकृदिति विदावह तपो रुध्येयो य क्विं च तपसा जय्य ७ सर्व ७ हैव तज्जयति ॥१८

१८

प

लोकः प्राशित्रं ॥ स यो ह वै लोकः प्राशित्रमिति वेदावह लोक ७ रुध्येयो य क्विं च लोकेन जय्य ७ सर्व ७ है
व तज्जयति ॥ नाह लावन लोकाद्व्ययति लावन ह वा ऋत्विग्भिर्ल्लोकोलोका च्यवाति य य एवं विद्दन ह वक्तव्य
न पापं स्यालोकाच्च्ययात ॥१९ श्रद्धेडा ॥ स यो ह वै श्रद्धेडेति विदावह श्रद्धा ७ रुध्येयो य क्विं च श्रद्धया
जय्य ७ सर्व ७ हैव तज्जयति ॥२० त्रयो निरवप्रथमोऽनुयाजः ॥ क्रतुर्नि द्वितीय ७ ल्कुषी तृतीयः ॥२१ स प्र
थममनुयाज मनुमंत्रयति ॥ अग्नान्यमुं जहीति यं द्विष्यात्क्रतुन्यमुं जहीति द्वितीयमुल्कुष्यमुं जहीति
तृतीयः ॥२२ स य एष द्विष्यं भ्रियात ॥ अग्नानिर्हतमनुयाजाहैव्यथा या विस्रवन्ति अङ्गवा क्रतुनिर्हत
मनुयाजा हेत्यय यो नुष्टमिव अङ्गवाल्कुषीहतमनुयाजा हेति ॥२३ स एषाय ज्ञामेनि ॥ एतया वै मन्या
देवा असुरान्पराभावयं चक्रुस्तथो एवेवं विद्यजमानः पाप्मानं द्विषंतं भ्रातृव्यं पराभावयति ॥२४ स

(18)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदनुयाजा जीतायज्ञः स्यात् अग्रशान्तः स्याद्वा ऽइयं ततः कुर्ध्यं तस्मादिदेवानां यज्ञ इडान्ता विवशं
स्यीता वा ॥२५ प्रयाजैर्वै देवाः स्वर्गं लोकमायंस्तानसुरा अन्वाजिगांसंस्तान्नुयाजैः प्रात्योहंस्तद्यदनु
याजा इज्यन्ते पाप्मानमेव तद्विषन्तं भ्रातृव्यं यजमानः प्रत्यूहति ॥२६ प्राणा वै प्रयाजा अपाना अनु
याजास्तस्मात्प्रयाजाः प्राञ्चो हूयन्ते तद्धि प्राणरूपं प्रत्यञ्चोऽनुयाजास्तदपानरूपं प्राणेत्ता ह वेद शीर्षण्या । १९
मासया रूपसदाय देनुयाजास्तस्मात्तउपस्थापणप्रत्यञ्चो हूयन्ते ॥२७ सञ्छा सूक्तवाकः सया
ह वै सञ्छा सूक्तवाक इति विद्वान्वह सञ्छां रूपधेयाय यज्ञियं च सञ्छया जय्यं सर्वं देवतं जयति
गच्छति वयसः सञ्छां ॥२८ प्रतिष्ठा शंयोर्वाकः सयाह वै प्रतिष्ठा शंयोर्वाक इति वेद वह प्रतिष्ठा
रूपधेयाय यज्ञियं च प्रतिष्ठया जय्यं सर्वं देवतं जयति गच्छति प्रतिष्ठां ॥२९ ता देवाः एतान्पत्नीसंया

१९

प

जान्पश्यान्यायौ हन्त मिथुनमेवैतदुपरिष्टाद्दधत प्रजात्या इति घ्य पत्नीसंयाजा इज्यन्ते मिथुनमेवैतदुपरि
ष्टाद्दधते प्रजात्यै देवानां ह वै प्रजातिमनु प्रजायते मिथुनेन मिथुनेन ह प्रजायते य एवमेतद्वेद ॥३०॥
अन्तं समिष्टयजुः सयो ह वा अन्तं समिष्टयजुरिति विद्वान्वहान्तं रूपधेयाय यज्ञिं चान्तेन जय्यं स
र्वं देवतं जयति ॥३१ संवत्सरो यजमानः तस्यैता वा याजयन्ति वसन्तश्चाग्नीध्रस्तस्माद्वसन्ते दावाऽव
रुन्ते तस्य ग्रीष्मोऽध्वर्युस्तप्त इव वा ह्येष ... वाध्वर्युर्निष्क्रामति वर्षा उद्गाता तस्माद्वर्षा बलवद्
घोतीसा ... शरद्ब्रह्मा तस्माद्यदा सस्यं पच्यते ब्रह्मण्वत्यः प्रजा इत्याहुर्हेमन्तो होता
तस्माद्धेमन्वषट्कृताः पशवः सीदन्त्येता ह वा एनं देवता याजयन्ति स य एवं मेधावी याजयत्यस्मा ऋत
एवादेवता मनसा ध्यायेत्ता हि देवेनं देवता याजयन्ति ॥३२ अथातोऽशेषवक्तव्याय दक्षिणा वेद्यन्तस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्साधु करोति तद्देवेभ्यो यदसाधु तद्बहिर्वेदि तस्माद्दक्षिणे वेद्यन्तमधिस्पृश्योपवासी तत्तुलायाँ २०॥
हवा अमुष्मिंल्लोक आदधति यतरद्यंस्यति तदन्वेष्यति यदि साधु वासाधु वेत्यथय एवं विद्वानस्मिन्नेव
लोके तुलामारोहत्यमुष्मिंल्लोके तुलाधानं मुच्यते साधुकृत्या हैवास्य यच्छति न पापकृत्या। २२ ब्राह्मणं॥
आ॥ वाग्घवा एतस्याग्निहोत्रस्याग्निहोत्री मन एव वत्सस्तद्वा इदं मनश्च वाक्च समानमेव सन्नानेव तस्मात्समा
न्यारज्ज्वा वत्सं च मातरं चाभिदधति तेज एव श्रद्धा सत्यमाज्यं। १ तद्धैतज्जनको वैदेहो याज्ञवल्क्यं पप्रच्छ
वेत्थाग्निहोत्रं याज्ञवल्क्या३ इति वेद सम्राडिति किमिति पय एवेति। २ यत्पयो न स्यात्। केन जु
हुया इति व्रीहियवाभ्यामिति यद्व्रीहियवौ न स्यातां केन जुहुया इति या अन्या ओषधय इति यदन्या
ओषधयो न स्युः केन जुहुया इति या आरण्या ओषधय इति यदारण्या ओषधयो न स्युः केन जुहुया इति

२०

प

वानस्पत्येनेति यद्वानस्पत्यं न स्यात्केन जुहुया इत्यद्भिरिति यदापो न स्युः केन जुहुया इति। ३ स होवा
च न वा इह तर्हि किंचनासीदथैतदहूयतैव सत्यं श्रद्धायामिति वेत्थाग्निहोत्रं याज्ञवल्क्य धेनुशतं द
दामीति होवाच। ४ तदप्येते श्लोकाः। किंस्विद्विद्वान्प्रवसत्यग्निहोत्री गृहेभ्यः कथंस्विदस्य काव्यं क
थं संततमग्निभिरिति कथंस्विदस्यानपप्रोषितं भवतीत्येवैतदाह। ५ यो जविष्ठो भुवनेषु स
विद्वान्प्रवसन्विदे तथा तदस्य काव्यं तथा संततमग्निभिरिति मन एवैतदाह मनसैवास्यानपप्रो
षितं भवतीति। ६ यच्च दूरं परेत्याथ तत्र प्रमाद्यति कस्मिन्नस्य हुता आहुतिर्गृहे याभ्यस्य जुह्वती
ति यच्च दूरं परेत्याथ तत्र प्रमाद्यति कस्मिन्नस्य सा हुताहुता भवतीत्येवैतदाह। ७ यो जागार भुवने
ष्वा विश्वा जातानि योऽबिभः तस्मिन्नस्य हुता आहुतिर्गृहे याभ्यस्य जुह्वतीति प्राणमेवैतदाह तस्मादाहुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री श्रीगणेशाय नमः   राम...   मिथुनेन   २२॥२२॥

प्राण एवाग्निहोत्रमितिः ब्राह्मणं ॥४॥ षड्याह वा अग्निहोत्रे षण्मिथुनानि वेद मिथुनेन ह प्रजायते सर्वा
भिः प्रजातिभि यजमानश्च पत्नी च तादेकं मिथुनं तस्मादस्य पत्नीवदग्निहोत्रं स्यादेतन्मिथुनमुपाप्नवा
नीति वत्सश्चाग्निहोत्री च तादेकं मिथुनं तस्मादस्य पुंवत्साग्निहोत्री स्यादेतन्मिथुनमुपाप्नवानीति स्था
ली चांगाराश्च तदेकं मिथुनं स्रुक्च स्रुवश्च तादेकं मिथुनमाहवनीयश्च समिधश्च तादेकं मिथुनमा
हुतिश्च स्वाहाकारश्च तदेकं मिथुनमेतानि ह वा अग्निहोत्रे षण्मिथुनानि तानि य एवं वेद मिथुनेन-
मिथुनेन ह प्रजायते सर्वाभिः प्रजातिभिः ॥ ब्राह्मणं ॥५॥ ब्रह्म वै मृत्यवे प्रजाः प्रायच्छत् तस्मै ब्रह्म
चारिणमेव न प्रायच्छत्सोऽब्रवीदस्तु मह्यमप्येतस्मिन्भाग इति यामेव रात्रिं समिधं नाहरातां इति त-
स्मा यां रात्रिं ब्रह्मचारी समिधं नाहरत्यायुष एव तामवदाय वसति तस्मा ब्रह्मचारी समिधमाहरे

२१

प

न्नेदायुषोऽवदाय वसानीति ॥१ दीर्घसत्रं वा एष उपैति यो ब्रह्मचर्यमुपैति स यामुपयन् समिधमादधा
ति सा प्रायणीया यां स्नास्यन्सोदयनीया या अन्तरेण सत्र्या एवास्य ता ब्राह्मणो ब्रह्मचर्यमुपयन्श्
चतुर्धा भूतानि प्रविशति अग्निं पदा मृत्युं पदाचार्यं पदात्मन्येवास्य चतुर्थः पादः परिशिष्यते ॥२ स यदग्नये
समिधमाहरति य एवास्याग्नौ पादस्तमेव तेन परिक्रीणाति तं संस्कृत्यात्मन्धत्ते स एनमाविशति
॥ अथ यदात्मानं दरिद्रीकृत्येव अह्रीर्भूत्वा भिक्षते य एवास्य मृत्यौ पादस्तमेव तेन परिक्रीणाति
तं संस्कृत्यात्मन्धत्ते स एनमाविशति ॥५ अथ यदाचार्यवचसं करोति यदाचार्याय कर्म करोति य एवा
स्याचार्ये पादस्तमेव तेन परिक्रीणाति तं संस्कृत्यात्मन्धत्ते स एनमाविशति न ह वै स्नात्वा भिक्षेत
अप ह वै स्नात्वा भिक्षां जयत्यप ज्ञातीनामशनायामपिपासां स एवं विद्वान्यस्या एव भूयिष्ठं स्ना-

२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ठेतत्तां निदधीत स्या उ ह स्मंल्लोकमिति स यद्यन्यां निधिं न विंदेदपि स्वामेवाचार्यजायां भिक्षेताथो स्वां मा
तरं नैनं सप्तम्यभिक्षितातीयात्तमेवं विद्वांसमेवं चरंतं सर्वे वेदा आविशंति यथा ह वा अग्निः समिद्धो
रोचत एवं ह वै स स्नात्वा रोचते य एवं विद्वान्ब्रह्मचर्यं चरति॥७ ब्राह्मणं॥६ उद्दालको हारुणिरुदी
च्यान्वृतो धावयांचकार तस्य निष्क उपाहित आस तद्ध स्मैवं तत्पूर्वेषां वृतानां धावयतामेकधनमुपाहितं
न वस्तूपवल्हाय बिभ्यतां तानुदीच्यानां ब्राह्मणान्भीर्विवेद कौरुपंचालो वा अयं ब्रह्मा ब्रह्मपुत्रः॥
यान्नो नायमर्धं न पर्याददीत हंतैनं ब्रह्मोद्यमाह्वयामहा इति केन वीरेणेति स्वैदायनेनेति शौन
को ह स्वैदायन आस । ते होचुः स्वैदायन त्वया वीरेण मे प्रतिसंयत्तामहा इति स होवाचोपात्र खलु
रमताहं न्वेनं न्वेदानीति तं हाभिप्रपेदे तं हाभिप्रपन्नमभ्युवाद स्वैदायना३ इति हा३ गौतमस्य पुत्रे

तीति रः प्रतिशुश्राव तं ह तत एव प्रपच्छ स्वैदायना३ स वै गौतमस्य पुत्र वृतो जनान्धावयितुं यो दर्शपूर्णमास
योरष्टौ पुरस्तादाज्यभागान्विद्यात्पंच मध्यतो हविर्भागान्षट् प्राजापत्यानष्टावुपरिष्टादाज्यभागान्॥४॥
स वै गौतमस्य पुत्र वृतो धेनून्धावयितुं यस्तद्दर्शपूर्णमासयोर्विद्याद्यस्मादिमाः प्रजा अदंतका जायं
ते यस्मादासां जायंते यस्मादासां प्रतिधीयंते यस्मादासां संतिष्ठंते यस्मादासां पुनरुत्तमे वयसि सर्वे
एव प्रतिधीयंते यस्मादधर एवाग्रे जायंते तथोत्तरे यस्मादणीयांस एवाधरे प्रथीयांस उत्तरे य
स्माद्दंष्ट्रा वर्षीयांसः सो यस्मात्समा एव जंभ्याः॥५ स वै गौतमस्य पुत्र वृतो जनान्धावयितुं यस्तद्दर्श
पूर्णमासयोर्विद्याद्यस्मादिमाः प्रजा लोमशा जायंते यस्मादासां पुनरिव श्मश्रूण्युपपक्षाणि उपस्थानि
णानि जायंते यस्माच्छीर्षण्येवाग्रे पलितो भवत्यथ पुनरुत्तमे वयसि सर्व एव पलितो भवतीति हा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सवैगौतमस्य पुत्र ऋतावानं भवायतु। यस्य द्वादशवर्षाणि मासाया द्विपाद्यस्या कुमारस्यारेतः सिक्तं न संभव
ति यस्मादस्य मध्यमे वयसि संभवति यस्मादस्य पुनरुत्तमे वयसि न संभवति॥७॥ यो गायत्री७ हरिणीं
ज्योतिष्पक्षां यजमान७ स्वर्गं लोकमभिवहन्तीं विद्यादिति तस्मै ह निष्कं प्रददावनूचानोऽसि वैदायनासि
सुवर्णं वा वसु वर्णं विदे ददतीति त७ ह्यापसु ह्यनिष्क्रामत७ ह पप्रच्छ किमिविष गौतमस्य पुत्रोऽद्र
दिति॥ ७स हा वा वा यथा ब्रह्मा ब्रह्मपुत्रो मूर्धस्य विपात यत्नमुपवहृत ति तात है ततत एव विप्रैस्सुस्र
७ह ततएव समित्पाणिः प्रतिचक्रम उपद्यायानीति किं मध्येष्यमाण इति यानेवमा प्रश्नान प्राक्षी
स्तानेव मे विब्रूहीति स हा वाचानुपेताय्येवृत एनान्नब्रवाणीति॥९॥ तस्मा उ ह तदुवाचा वा वाघा
रौ पंच प्रयाजा आग्नेयश्चाज्यभागो हमे एतत्पुरस्तादाज्यभागाः सौम्य आज्यभागो हविर्भागाणां

२२

५

प्रथमो हविर्हि सोमस्याग्नेयः पुरोडाशो ऽग्नीषोमीयश्च पा७श्चुयाजा ग्नीषोमीयः पुरोडाशोऽग्निः स्विष्टकृदे
त पंच मध्यतो हविर्भागाः॥१०॥ प्राशित्रं त्व इडा च यच्चाग्नीध्र आदधाति ब्रह्मभागो यजमानभागो ऽन्वाहार्य
७ त्रय अनुयाजा पत्नी संयाजा अनुयाजा चत्वारः पत्नी संयाजाः समिष्टयजुरष्टमं तत एतत्परिष्टादाज्यभा
गाः॥११॥ अथ यत्पुरोनुवाक्यकाः प्रयाजा भवंति। तस्मादिमाः प्रजा अदन्तका जायंते तथ यत्पुरोनुवाक्या
वंति हवी७षि भवंति तस्मादासां जायंते तथ यत्पुरोनुवाक्या अनुयाजा भवंति तस्मादासां प्रतिष्ठं
तथ यत्पुरोनुवाक्यवंतः पत्नी संयाजा भवंति तस्मादासा७ संतिष्ठंते तथ यदपुरोनुवाक्य क७स
मिष्टयजुर्भवति तस्मादासां पुनरुत्तमे वयसि सर्वं एव प्रतिघ्नंते॥१२॥ अथ यदनुवाक्या मनुष्या याज्य
या यजति तस्मादधर एवाग्रे जायते तथो उत्तर अथ यज्ञायत्रीमनुद्रुच्य त्रिष्टुभा यजति तस्मादृणीया७स

(23)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवाधरं पृथीयाः सतृणस्तरथ यत्प्रांवावाघारावाघारयति तस्मादूर्ध्वा पृथीयाः ओषधयः समुद्धंदसावे
वसंयाभ्येभवतस्मस्मात्समा एवजं त्वा॥३॥ अथ यद्बर्हिस्तृणाति। तस्मादिमाः प्रजालोमशाजायंते। तथ
यत्पुनरिव प्रस्तरः स्तृणाति तस्माद्दासौ पुनरिव श्मश्रूण्योपपक्षाणि दुर्वीरिणानि जायंते तथ यत्केवल व
मेवाग्रे प्रस्तरमनुप्रहरति तस्माच्छीर्षण्येवाग्रे पलितो भवत्यथ यत्सर्वमेव बर्हिरनुप्रहरति तस्माद्भु
नरुत्तमे वयसि सर्व एव पलितो भवति॥४॥ अथ यदाज्यहविषः प्रयाजा भवंति। तस्मात्कुमारस्य रे
तः सिक्तं नसंभवस्युदकमिवैव भवत्युदकमिव ह्याज्यमथ यन्मध्ये यज्ञस्य दध्ना पुरोडाशेनेति
चरंति तस्मादस्य मध्यमे वयसि संभवति नसीवैव भवति नसीव हि रात्राथ यदाज्यहविष एवानुया
जा भवंति तस्मादस्य पुनरुत्तमे वयसि नसंभवस्युदकमिवैव भवत्युदकमिव ह्याज्यं॥५॥ वेदिरव

२४

प

गायत्री। तस्यै याष्टै पुरस्तादाज्यभागाः स दक्षिणः पक्षो याष्टा उपरिष्टादाज्यभागाः स उत्तरः पक्षः सैषा
गायत्री हरिणी ज्योतिष्पक्षा यजमानः स्वर्गं लोकमभिवहति य एवमेतद्वेद॥६॥ ब्राह्मणं॥७॥ अथातः स्क
न्नारादानस्यातद्धैतदेके उत्तरासं मन्यमाना दक्षिणेनैव जुहूमाददातस्तथा नापवृत्तं न तथा कुर्या
घोहि नेंततत्र ब्रूयात् प्रति प्रतिष्ठा अयमध्वर्युर्यजमानस्य द्विषंतं भ्रातृव्यमकस्मस्तु घाभिनमितीश्वरो
ह तथैव स्यात्। इत्थमेव कुर्यात्। उभाभ्यामेव पाणिभ्यां जुहूं परिगृह्योपवृत्त्याधिनिदध्यात्तस्य नाय मीमां
सा स्विल्पत्रायमा युष्मांत भ्रसः शिंजयन्नाददीत ते यत्र शिंजायदर्यात गच्छेयो यजमानमृच्छे
त्तस्मादसः शिंजयन्नाददीत॥१॥ अथातो तिक्रमणस्याध्वर्युणैवाहवात्मन्याध्वर्युर्यजमानस्य पश्चाद्विधि
मति ब्रह्मणा हास्मात् अन्यत उपसमृत्स्यैष हवात्म अध्वर्युर्ब्रह्मणा यजमानस्य पश्चाद्विधमतिय आत्माव

५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यिष्य दक्षिणेनातिक्रामति स एनां आप्नाया देहास्मा एष उपसमूहतीति यद्याग्नावयिष्यन्नुद्येनातिक्रामति द
क्षिणेनाग्नाध्येषहास्मात् उपसमूहतीति ३ अथातो धारणस्या । तुद्वितादकेकुशला मन्यमानाः प्रवृत्य बाहूस्क
न्धो धारयंति न तथा कुर्या यो हैनं तत्र ब्रूयाद्बालो न्वा अयमध्वर्युर्बाहू अस्तस्तं बाहू न वि विष्यतीतीश्व
रो ह तथैव स्यादथो हैष मध्यमः प्राणस्तस्मादु तमुपन्यच्य विवक्षारये तृ ४ अथात आश्रावणस्य । षड्वा
आश्रावितानि न्यक्रियं अबृंहत्पूर्णं बहिः अन्तः आप एत[illegible] विन्यकूयायामुच्चै राद्राय यज्ञानेनिर्दधाति
स यमिच्छेत्पापीयान्स्यादिति तस्योच्चै राद्राय यज्ञानेनिर्दधात्तेन स पापीयान्भवति । ६ अथ हैत न्नियक्
याये यावतेवाददीत तावतानिर्दधाति स यमिच्छेन्निवस्यान्स्यान्नपापीयानिति तस्य यावते वाददीत
तावता निर्दधात्तेन स नेव श्रेयान्न पापीयान्भवति ७ अथाहैत दद्वीयायां ८ यज्ञानेराद्राय्योच्चै निर्दधाति

स यमिच्छेच्छ्रेयान्स्यादिति तस्य यज्ञाने राद्रायोच्चै निर्दधात्तेन स श्रेयान्भवति ८ अथाहैत कृपणं । या
यमणुदीर्घमस्वरमाश्रावयति या हैनं तत्र ब्रूयात्कृपणन्वा अयमध्वर्युर्यजमानमकर्षिष्ट तात्रार्तिमाप्स्या
पावसायिनमितीश्वरो ह तथैव स्यात् ९ अथ हैत बहिः श्रियायामप च्याद्रायोच्चैरस्वरमाश्रावया
ति श्रीर्वै स्वरो बाह्यतएवतच्छ्रियं धत्ते शनाप्तुका तवति १० अथाहैतदन्तः श्रियो य ६ संक्षायोच्चैः स्व
रवदाश्रावयति श्रीर्वै स्वरोन्तरत एव तच्छ्रियं धत्ते न्नादाभवति ११ स वे मन्द्रमिवारसिपरास्त्वानय
तो बाहैत मुच्चैरं स्वराता निर्दधात्तस्यानाप मीला ६ सास्मितल्पशाच्यमाभुष्पं १२ अथातो हानमस्यां तद्धित
दाक कुशला मन्यमानाः प्राचीं व स्कन्धमुपावहन्तपकुर्वा पर्याहृत्पो प्रवृत्य धिनिदधाति न तथा कुर्या
यो हैनं तत्र ब्रूयादन्वखुवत्वा अयमध्वर्युर्यजमानमकर्षिष्टात्त्रार्तिमाप्स्यात्यवसायिनमितीश्वरो

२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दतैवस्यात्॥१३ पार्ष्वतउहोवाच कप्रवहत्य स्रुच्यापर्याहृत्योपहृत्यमिनिदधतिनतथाकुर्यादृषा
हिनंतत्रकुर्यादतीर्थेनचाक्रयमध्वर्युराकृतीः प्रारोसीसंवाग्नेरिष्यात्तघुणिर्वानविष्यतीतीष्वरोहतुथै
वस्याद्॥१४ इच्छामवकुर्यात्प्रावीमेवस्रुचमुपावहृत्यस्रुच्यातानेवाभिहृत्योपहृत्यमिनिदधात्तस्याना
पमीमा॥ स्वास्तितत्पत्राद्यमातुष्यं॥१५ प्रदग्धाहुतिर्देवा अन्वोध्वर्युः आकृतीर्हन्यः सन्तर्प्पयत्येषहवै
प्रदग्धाहुतिरध्वर्युर्य्यायमाज्यं जुह्वावदानानिजुहोत्येतद्धवैतद्दृष्टपमानाबागन्तुवाद प्रदग्धा
हुतिर्न्वाक्रयमध्वर्युरित्यथहैनाएषसंतर्प्पयति॥ याययमाज्यं जुह्वावदानानिजुहोत्यथपुनरंत
तआज्येनाभिजुहोत्येषाहैनाः सन्तर्प्पयति॥ सा॥७ संरत्नानीदेवाहिरण्मयांश्चमसान्भूरयांता
१६ तद्धहोवाचयाज्ञवल्क्यः॥ यद्वाउहेपस्तीर्यावदायाभिघारयतितादवेनाः सन्तर्प्पयतितास्ता॥७ से

२६

इमानोदेवाहिरण्मयांश्चमसान्भूरयेतयस्त्रुणगृहपतीना॥७ हवितृहोत्वायानाध्वर्युरासा॥१७ सहोवाच म्मी
वाइदमाहद॥७ सत्रेसगापद्वत्पाउपमथायंगृहपतिरस्मीतिमन्यतइति॥१८ सहोवाच॥ अध्वर्योवावोनाकु
दशतवितस्कावोयब्रू॥७ संवत्सरंनाशकत्आदाउँयदिवाहमेतायोरनुशिष्याप्रप्रजयापशुभिर्ज्जीय
थाअतिस्वर्गेलोकेब्रूहीति॥१९ सहोवाच॥ उपजायानीतिसहोवाचात्रवावरवल्वहसितायानः सं
वत्सरध्वर्युरन्वरनुपताप्येवतएनजवागीतितस्माउहेतादवस्कात्वारादानमुवाचयदेतद्भारथ्वा
मतस्मादेवंविदमेवाध्वर्युंकुर्वीतनानेवंविदं॥२० ब्राह्मणं॥ द्वितीयः प्रपाठकः समाप्तः॥ब्रा॥ कंडिका
१०॥ब्रा॥ प्रजापतिर्वैप्रजाःसृजमानोऽतप्यत॥ तस्माच्छ्रांतात्तेपानाच्छ्रीरुदक्रामत्सादीप्यमानाभ्राज
मानालेलायंत्यतिष्ठत्तांदीप्यमानांभ्राजमानांलेलायंतींदेवाअभ्यध्यायंस्तेप्रजापतिमब्रुवन्।

28

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हनामस्मा मेदमस्या ददाम हा इतिसा हावाच स्त्री वा एषा यच्छ्री नवि स्त्रियं घ्नंत्युत त्वा अस्या जीवंत्या एवाद द
तइति।२ तस्या अग्निरन्नाद्यमादत्त सोमो राज्यं वरुणः साम्राज्यं मित्रः क्षत्रमिंद्रो बलं बृहस्पतिर्ब्रह्मव
र्चसं ७ सविता राष्ट्रं पूषा भगं ८ सरस्वती पुष्टिं त्वष्टा रूपाणि ३ सा प्रजापतिमब्रवीत् आद्वे म इदमदि
षातति स हावाच यज्ञेनैनानि पुनर्याचस्वेति ४ स एतां दशहविषमिष्टिमपश्यत्। आग्नेयमष्टाकपा
लं पुरोडाशं ५ सौम्यं चरुं वारुणं दशकपालं पुरोडाशं मैत्रं चरुमिंद्रमेकादशकपालं पुरोडाशं बा
र्हस्पत्यं चरुं ७ सावित्रं द्वादशकपालं वाष्टाकपालं वा पुरोडाशं पौष्णं चरुं ७ सारस्वतं चरुं त्वाष्ट्रं
दशकपालं पुरोडाशं ६ एतानि तयानुवाक्यान्यवदत् अग्निः सोमो वरुणो मित्र इंद्रो बृहस्पतिः स
विता यः सहस्री। पूषा नो गोभिरवसा सरस्वती त्वष्टा रूपाणि समनक्तु यज्ञैरिति तत्प्रत्युपातिष्ठंद॥
ना

२७

ता न तया याज्यया। परस्तात्प्रतिलोमं पूर्वत्वे च त्वष्टा रूपाणि ददती सरस्वती पूषा भगं ८ सविता मे ददातु।
बृहस्पतिर्ददद् इंद्रो बलं मे मित्रः क्षत्रं वरुणः सोमो अग्निरिति तत्र न हविर्नाया प्रियं तौ ७ स्विता नुपद
मानपश्यत्। अग्निरन्नादोन्नपतिरन्नाद्यमस्मिन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादायाग्निरुदक्रा
मत्पुनरस्या अन्नाद्यमददात् ८ सोमो राजा राजपतिः राज्यमस्मिन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादा
य सोम उदक्रामत्पुनरस्यै राज्यमददात् ९ वरुणः सम्राट् सम्राट्पतिः। साम्राज्यमस्मिन्यज्ञे मयि दधा
तु स्वाहेत्याहुतिमेवादाय वरुण उदक्रामत्पुनरस्यै साम्राज्यमददात् १० मित्रः क्षत्रं क्षत्रपतिः क्षत्र
मस्मिन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय मित्र उदक्रामत्पुनरस्यै क्षत्रमददात् ११ इंद्रो बलं बल
पतिः। बलमस्मिन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादायेंद्र उदक्रामत्पुनरस्यै बलमददात् १२ बृह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्पतिर्ब्रह्म ब्रह्मपतिः। ब्रह्मवर्चसमस्मिन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय बृहस्पतिरुदक्राम
त्सु नरस्यै ब्रह्मवर्चसमदधात्।१३ सविता राष्ट्रं राष्ट्रपतिः। राष्ट्रमस्मिन्यज्ञे मयि दधातु स्वाहेत्याहुतिमे
वादाय सवितोदक्रामत्सु नरस्यै राष्ट्रमदधात्।१४ पूषा भगं भगपतिः। भगमस्मिन्यज्ञे मयि दधातु स्वाहे
त्याहुतिमेवादाय पूषोदक्रामत्सु नरस्यै भगमदधात्।१५ सरस्वती पुष्टिं पुष्टिपतिः। पुष्टिमस्मिन्यज्ञे म
यि दधातु स्वाहेत्याहुतिमेवादाय सरस्वत्युदक्रामत्सु नरस्यै पुष्टिमदधात्।१६ त्वष्टा रूपाणि रूपपतिः रूपप
तिः रूपाण्यस्मिन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय त्वष्टोदक्रामत्सु नरस्यै रूपाण्यस्मिन्नद
दात्।१७ ता वा एताः दश देवता दश हवींषि दशाहुतयो दश दक्षिणा दशाक्षरा विराड्विरा
ड्श्रिया हि तद्विराज्यन्नाद्ये प्रतितिष्ठति।१८ तस्यै पंचदश सामिधेन्यो भवन्ति। उपांशु देवता यजति २८

८६

पंच प्रयाजा भवंति त्रयोनुयाजा एकं समिष्टयजुः पुष्टिमंतावाज्यभागावग्निना रयिमश्नवत्पोष
मेव दिवेदिवे। यशसं वीरवत्तमं। गयस्फानोऽमीवहा वसुवित्पुष्टिवर्धनः। सुमित्रः सोम नो भवेति
सहस्रवान्पोसं याज्ये हूतानाराद्य सहस्र शतानीकव पुष्टिमद्वसु। धृमग्ने सुवीर्यं वर्षिष्ठमनुपहितं ताग श्री
तानाब्रह्मन्नविषण्णं देवकृतमः। शंनः शो वा मरुद्भ्योऽग्नेः सहस्रसातम शति।१९ तां हितां गोतमो
राहूगणो। विदांचकार सा ह जनकं वैदेहं प्रत्युत्ससाद तां हांगजिद्ब्राह्मणेष्वन्वेषतामुद्दयाज्ञव
ल्क्ये विविद स हावाच सहस्रं लायाज्ञवल्क्य दद्मो यस्मिन्वयं त्वयि मित्रविंदामन्वविदामेति विंदाति मि
त्रं राष्ट्रमस्य भवत्यपपुनर्मृत्युं जयति सर्वमायुरेति य एवं विद्वानेतयेष्ट्या यजते यो चैतादेवं वेद।
२० ब्राह्मणं॥१ अथातो हविषः समृद्धिः। षट् वै ब्रह्मणो द्वाराग्निर्वायुरापश्चंद्रमा विद्युदादित्यः॥

28

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२७॥

स यदुपदग्धेन हविषा यजाते। अग्निना ह स ब्रह्मणो द्वारेण प्रतिपद्यते सो ऽग्निना ब्रह्मणो द्वारेण प्रति
पद्य ब्रह्मणः सायुज्यं सलोकतां जयति॥२॥ अथ यया विपतितेन हविषा यजाते। वायुना ह स ब्रह्मणो द्वा
रेण प्रतिपद्यते स वायुना ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यं सलोकतां जयति॥३॥ अथ यो शृत
न हविषा यजाते। अग्निर्ह स ब्रह्मणो द्वारेण प्रतिपद्यते सो ऽग्नि ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायु
